# आदर्श–प्रश्नपत्रम्
# हाईस्कूल परीक्षा–2013
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् पूर्णाङ्काः 100

निर्देशा :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत– 1x4= 4

(क) 'सदैव' इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) अयादिसन्धिः (ब) गुणसन्धिः

(स) वृद्धिसन्धिः (द) दीर्घसन्धिः

(ख) विसर्ग सन्धेः उदाहरणम् अस्ति–

(अ) सहोदरः (ब) मनोरथः

(स) जगदीशः (द) नयनम्

(ग) 'वाक्+ईशः' इत्यस्य सन्धिः अस्ति –

(अ) वागीशः (ब) वाकीशः

(स) वागिशः (द) वाशीशः

(घ) 'परोपकारः' एतस्य सन्धि विच्छेदः अस्ति–

(अ) पराः+उपकारः (ब) पर+उपकारः

(स) परोःउपकारः (द) परोप+कारः

2. उचित विकल्पं चित्वा लिखत– 1x3 = 3

(क) 'पितरौ' इत्यस्मिन् पदे समासः अस्ति–

(अ) द्विगुसमासः (ब) तत्पुरूष समासः

(स) द्वन्द्वसमासः: (द) बहुब्रीहि समासः

(ख) अव्ययीभाव समासस्य उदाहरणम् अस्ति–

(अ) प्रतिदिनम्: (ब) महापुरूषः:

(स) त्रिभुवनम्: (द) दशाननः

(ग) 'धनहीनः' इत्यस्य पदस्य समासविग्रहः अस्ति–

(अ) धनात्हीनः: (ब) धनेनहीनः

(स) धनस्यहीनः (द) धनम्हीनः

3. उचित विकल्पं चित्वा लिखत– 1x4 = 4

(क) 'अपचत्' इत्यस्मिन् पदे पुरूषः अस्ति–

(अ) प्रथमपुरूषः (ब) मध्यमपुरूषः

(स) उत्तम पुरूषः

(ख) 'पश्यावः' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

(ग) 'लप्स्यते' इत्यस्मिन् पदे धातुः अस्ति–

(अ) लप् (ब) लटस्य्

(स) लभ् (द) लप्स्

(घ) 'गच्छेयुः' इत्यस्मिन् पदे लकारः अस्ति–

(अ) लट्लकारः (ब) लोट् लकारः

(स) लङ्.लकारः: (द) विधिलिङ्.लकारः

4. उचित विकल्पं चित्वा लिखत– 1x2 =2

(क) 'दुराचारः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(अ) दुर् (ब) दुश

(स) दु (द) चार

(ख) अधोलिखितेषु उपसर्गः नास्ति–

(अ) अस् (ब) अप

(स) अव (द) अपि

5 उचित शब्देन सूक्तिं पूरयत– 1x2 = 2

(क) ––––––––च सारं च वचोहि वग्मिता। (हितं / मितं)

(ख) सर्पः क्रूरः खलः क्रूरः सर्पात्क्रूरतरः –––––––––।(खलः / सज्जनः)

6. उचित विकल्पं चित्वा लिखत– 1x4 = 4

(क) 'कर्तुम्' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) क्त्वा (ब) तुमन्

(स) ल्यप् (द) क्त

(ख) 'क्त्वा' प्रत्ययस्य उदाहरणम् अस्ति–

(अ) नीत्वा (ब) गतः

(स) आदाय (द) नेतुम्

(ग) 'पठ्+शतृ' इत्यस्य पदम् भविष्यति–

(अ) पठित्वा (ब) पठितुम्

(स) पठन् (द) पठनीयम्

(घ) 'गुणवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) क्तवतु (ब) शानच्

(स) तत्यत् (द) मतुप्

7. अव्ययविषये उचितविकल्पं चित्वा लिखत– 1x2 = 2

(क) अधोलिखितेषु अव्ययं नास्ति–

(अ) अत्र (ब) अधुना

(स) तदा (द) अनु

(ख) 'सदाचार एवं परमोधर्म 'इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(अ) सदाचारः (ब) एव

(स) परम (द) धर्मः

8. युग्ममेलनं कुरुत – 4

| | अ | | ब |
|---|---|---|---|
| (क) | प्राचीन : | – | अ) वृद्धः |
| (ख) | द्विजश्रेष्ठ | – | ब) शिष्यः |
| (ग) | वासुदेवः: | – | स) न्यूग्रोधवृक्षः |
| (घ) | कालगणना | – | द) खगोलशास्त्रम |
| | | | य) समयः |

9. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत– 1x4 = 4

(क) महर्षेः ख्यातिः सर्वत्र व्याप्ता अस्ति। ☐

(ख) संस्कृत विश्वस्य महत्तमा भोषा अस्ति। ☐

(ग) मानव शरीर देवदुर्लभं नास्ति– ☐

(घ) भगीरथः गङ्गा भूमौ न आनीतवान्। ☐

10. प्रदत्तैः शब्दैः रिक्तस्थानानि पूर्ति करणीया। 1x4 = 4

(भूतानि, छत्रसालदशक, पापेऽपि, ऋते, भवानि)

(क) यस्मान्न ......................... किंचन कर्म क्रियते।

(ख) दानेन ............... वशी भवन्ति।

(ग) न ............. पापी स्यात्।

(घ) भूषण............. इतिकाव्य रचनां अकरोत्।

11. अधोलिखित प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत– 1x4 = 4

(क) महर्षिः दयानन्दः कस्य स्थापनां कृतवान् ?

(ख) भारतीयैकता साधकं किम् ?

(ग) सिद्धार्थस्य पुत्रः कः आसीत् ?

(घ) जलम् बिना किम् न सम्भवम् ?

(ङ.) वरतन्तुशिष्यः कः आसीत् ?

12. अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत– 2x3 = 6

(क) मे मनः किम् अस्तु ?

(ख) क न भिन्द्यात् ?

(ग) कस्याः अपरं नाम भागीरथी ?

(घ) देवताः कुत्र रमन्ते ?

13. अधोलिखितेषु चत्वारि त्रिषु वचनेषु लिखत– 1x4 = 4

(क) राम– षष्ठी विभक्तिः।

(ख) राजन्– तृतीया विभक्तिः।

(ग) युष्मद्– चतुर्थी विभक्तिः।

(घ) नदी– द्वितीया विभक्तिः।

(ङ.) फल– द्वितीया विभक्तिः।

14. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया– 1x5 = 5

(क) पुत्रः जनकस्य सह गच्छति।

(ख) कृष्णस्य परितः भक्ताः सन्ति।

(ग) गङ.गा हिमालयेन निर्गच्छति।

(घ) धनम् कोषं अस्ति।

(ङ.) नृपः दीनम् दानं ददाति।

(च) गणेशः शिवम् पुत्रः अस्ति।

15. प्रश्न–पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितश्लोकद्वयं लिखत– 4

16. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत– 5

(क) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

(ख) सथकारः गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः।

(ग) तेन प्रचुराउस्ष्ट्राः करभाश्च सम्मिलिताः।

(घ) वने प्रसववेदनया पीड्ययानाम् उष्ट्रीम् अपश्यत्।

(ड.) रथकारः दारिद्रयोपहतः देशान्निष्क्रान्तः।

17. अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 10

(अ) देवराजे जीवति सति अपि कोऽपि तस्मिन् आदरवान् न। रामदेवः तु विशंतिवर्षेभ्यः पूर्वम् एव दिवंगतः चेदपि जनाः प्रतिदनं तं स्मरान्ते। यः समाजहितं चिन्तयति सः मृतोऽपि जीवति। यः स्वार्थमात्रं चिन्तयति सः तु जीवन्नपि मृतः एव इति अवगतवान्। वासुदेवः ''मया रामदेवस्य जीवनम् एव अनुसरणीयम्'' इति सङ्कल्प्य स्वग्रामम् अगच्छत्

(क) जनाः कं प्रतिदिनं स्मरन्ति स्म ?

(ख) कः जीवन्नपि मृतः एव भवति ?

(ग) कः मृतोऽपि जीवति ?

(घ) किं सङ्कल्प्य वासुदेवः स्वग्रामम् अगच्छत् ?

(ड.) 'रामदिवस्य' इत्यस्य पदस्य विभक्तिः वचनं च लिखत ?

(ब) मनुष्य सदा नीरोगः भवेत् ? अतएव स्वस्थशरीरार्थं बहवः उपायाः वर्णिताः सन्ति। वैधकशास्त्रम् आरोग्यशास्त्रम् अपि कथ्यते। स्वास्थ्यघातकाः ये राजरोगादयः सन्ति। तेषां सर्वथा रामनाय द्विसप्ततिविधाः चिकित्साः करणीयाः।

(क) कः सदा नीरोगः भवेत् ?

(ख) वैधकशास्त्रम् अपरं नाम किं अस्ति ?

(ग) स्वस्थशरीरर्थम् कति उपायाः वर्णिताः सन्ति ?

(घ) राजरोगानां सर्वथा रामनास कवि विधाः चिकित्साः करणीयाः ?

(ड.) 'राजरोगादयः' पदस्य सन्धि विच्छेदः कृत्वा सन्धेः नाम लिखत ?

(स) मध्यप्रदेशस्थानगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन् काले 'भलेसा' इति नाम्ना सुविख्याता आसीत्। एतस्य कारणं सूर्य देवतायाः मन्दिरस्य 'भेल्लस्वामिनः इति लोकख्यातिरेव। पुरा विदिशानगरी समुन्नतमेंक वाणिज्यिक केन्द्रमासीत्। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्थ कर्ता महर्षिः पतंजलिः सम्राट अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम्।

(क) विदिशा पूर्वस्मिन् काले कया नाम्ना सुविख्याता आसीत् ?

(ख) कस्याः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव ?

(ग) पुरा का नगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत ?

(घ) योगदर्शनस्य प्रणेता कः आसीत् ?

(ड.) 'आसीत्' इत्यस्य पदस्य धातुः पुरूषं च लिखत ?

18 अधोलिखित पद्यांशशेषु पद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायम् देयानि– 10

(अ) गङ्गा पापं शशीतापं दैन्यं कल्पतरूस्तथा।
पापं तापं च दैन्यं च हर्नान्त सन्तोमहाशयाः।।

(क) का पापं हन्ति ?

(ख) शशी किं हन्ति ?

(ग) कल्पतरूः किं हन्ति ?

(घ) पापं तापं दैन्यं च के ध्नन्ति ?

(ड.) 'पापं' इति शब्दस्य विलोमपदं लिखत ?

(ब) धनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति।
नवैर्जलौधैर्धरणी वितृप्ता तमोविलिप्ता न दिशः प्रकाशाः।।

(क) धनोपगूढं किम् ?

(ख) ताराः भास्करः च किं न अभ्युपैति ?

(ग) धरणी कैः वितृप्ता ?

(घ) तमोविलिप्ता काः न प्रकाशाः ?

(ङ.) ''धनोपगूढं' इति पदस्य सन्धि विच्छेदं कृत्वा सन्धेः नाम लिखत ?

स. सत्येन धार्यते पृथ्वी, सत्येन तपते रविः।
सत्येन वाति वायुश्च, सर्वं सत्ये प्रतिष्ठितम्।।

(क) पृथ्वी केन धार्यते ?

(ख) कः सत्येन तपते ?

(ग) वायुः केन वाति ?

(घ) सर्वम् केन प्रतिष्ठितम् ?

(ङ.) 'धार्यते' इत्यस्य पदस्य धातुः लकारः च लिखत ?

प्र. 19 अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत 5

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमिः स्वार्गात् उत्कृष्टतरा अस्ति। सा लोकानांशरण दायिनी, विविधखाद्यपदार्थ प्रदायिनी, सर्वव्यवहाराणां लीलाभूमिः च अस्ति। वैदिकः ऋषिः कथयति माताभूमिः पुत्रोऽहं पृथिव्याः। वयं राष्ट्रभाषां राष्ट्रियचरित्रं, त्यागभावनां विना राष्ट्रस्य संरक्षणं कर्तुम् न परयामः। परस्परैक्य भावनां बिना राष्ट्रं कदापि समृद्धं न भवति। अतः अस्माभिः स्वार्थं परित्यज्य देशस्य देशवासिनां च सेवां सततं करणीया।

(क) जन्मभूमिः कस्मात् गरीयसी ?

(ख) 'माताभूमिः' इति कः कथयति ?

(ग) परस्परैक्यभावनां विना किम् समृद्धं न भवति ?

(घ) 'स्वर्गात्' शब्दे का विभक्तिः अस्ति ?

(ङ.) 'कदापि' इत्यस्य पदस्य संधि विच्छेदं कृत्वा सन्धेः नाम लिखत ?

20. स्वस्य प्राचार्यस्य कृते अवकाशार्थम् प्रार्थनापत्रं लिखत। 4

अथवा

स्वस्य मित्रस्य कृते नववर्षस्य अभिनन्दनपत्र लिखत।

21. अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृते निबंधं लिखत। 10

(1) महाकविः कालिदासः

(2) दीपावलिः (उत्सवः)

(3) सदाचारः

(4) छात्रजीवनम्

# आदर्श–उत्तरपत्रम्
# हाईस्कूल परीक्षा–2013
# संस्कृतम् (सामान्यम्)

**(1) सन्धिः** 1x4 = 4

(क) स. वृद्धि सन्धिः

(ख) ब. मनोरथः

(ग) अ वागीशः

(घ) ब पर+उपकारः

**(2) समासः**

(क) स द्वन्द्व समासः 1x3 = 3

(ख) अ प्रतिदिनम्

(ग) ब धनेनहीनः

**(3) धातु रूप** 1x4 = 4

क अ प्रथमपुरूष

ख ब द्विवचनम्

ग. स लभ्

घ. द. विधिलिङ्.लकारः

**(4) उपसर्गः** 1x2 = 2

क अ दुर्

ख अ अस्

**(5) सूक्तिनिर्माणम्–** 1x2 = 2

क मितं

ख खलः

**(6) प्रत्ययः** 1x4 = 4

क ब तुमुन्

ख अ नीत्वा

ग स पठन्

घ द मतुप्

**(7) अव्ययः** 1x2 = 2

क द अनु

ख ब एव

**(8) उचित युग्म मेलनम्–**

| | अ | ब | |
|---|---|---|---|
| | | | 1x4 = 4 |
| क) | प्राचीन : | न्यग्रोधवृक्षः | |
| ख) | द्विजश्रेष्ठ | वृद्ध | |
| (ग) | वासुदेवः: | शिष्यः | |
| (घ) | कालगणना | खगोलशास्त्रम् | |

**(9) शुद्धाशुद्धौ**

(क) आम् (ख) आम् (ग) न (घ) न 1x4 = 4

**(10) रिक्तस्थानपूर्ति** 1x4 = 4

क ऋते (ख) भूतानि (ग) पापेऽपि (घ) छत्रसालदशक

**(11) एकपदेन उत्तराणि** 1x4 = 4

क आर्यसमाजस्य

ख संस्कृतम्

ग. राहुलः

घ. जीवनम्

ङ. कौत्सः

**(12) एकवाक्यने उत्तराणि–** 2x3 = 6

क. मे मनः शिवसङ्कल्पम् अस्तु।

ख. नियमम् न भिन्दयात्।

ग. गङ्गायाः अपरं नाम भागीरथी।

घ. यत्र नार्यस्तु पूज्यन्ते तत्र देवताः रमन्ते।

**(13) शब्द रूपाणि** 1x4 = 4

| | | | |
|---|---|---|---|
| क. | रामस्य | रामयोः | रामाणाम् |
| ख. | राज्ञा | राजभ्याम् | राजभिः। |
| ग. | तुभ्यम् | युवाभ्याम् | युष्मभ्यम्। |
| घ. | नदीम् | नद्यौ | नदीः। |
| ङ. | फलम् | फले | फलानि। |

**(14) कारक प्रयोग :** 1x5 = 5

क. पुत्रः जनकेन सह गच्छति।

ख. कृष्णस्य परितः भक्ताः सन्ति।

ग. गङ्गा हिमालयेन निर्गच्छति।

घ. धनम् कोषें अस्ति।

ङ. नृपः दीनाथ दानं ददाति।

च. गणेशः शिवस्य पुत्रः अस्ति।

15) प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठीस्थीकृतं सुभाषित श्लोकद्वयं लिखत।

1. नात्युच्चशिखरो मेरूर्नातिनीचं रसातलम् 4

व्यवसायद्वितीयानां नाप्यपारो महोदधिः।।

2. सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।

अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते।

प्रत्येक इसी प्रकार के शुद्ध सुभाषित पर 2–2 अंक प्राप्त होंगे।

16 अधोलिखितेषु वाक्यानां कथाक्रम संयोजनं कुरूतः– 5

(v) रथकारः दारिद्रयोपहतः देशान्निष्क्रान्तः।

(iv) वने प्रसववेदनया पीड्ययानाम् उष्ट्रीम् अपश्यत्।

(ii) रथकारः गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः।

(iii) तेन प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः।

(i) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

**17 गद्यांशम्**

**अ. उत्तराणि** 10

(i) जनाः रामदेवं प्रतिदिनं स्मरन्ति स्म।

(ii) यः स्वार्थमात्रं चिन्तयति सः तु जीवन्नपि मृतः एव भवत्ति।

(iii) यः समाजहितं चिन्तयति सः मृतोऽपि जीवति।

(iv) ''मया रामदेवस्य जीवनम् एव अनुसरणीयम्'' इति सड.ल्प्य वासुदेवः स्वग्रामम् अगच्छत।

(v) 'रामदेवस्य'– षष्ठी विभक्तिः – एकवचनम्

ब उत्तराणि–

(i) मनुष्य सदा नीरोगः भवेत्।

(ii) वैधकशास्त्रम् अपरं नाम आरोग्यशास्त्रम अस्ति।

(iii) स्वस्थशरीरार्थम् बहवः उपायाः वर्णिताः सन्ति।

(iv) राजरोगानाम् सर्वथा रामनाय द्विसप्ततिविधाः चिकित्साः करणीयाः।

(v) 'राजरोगादयः'–राजरोग+आदयः–दीर्घ–स्वर संधिः।

ब उत्तराणि–

(i) विदिशा पूर्वस्मिन् काले भेलसा इति नाम्ना सुविख्याता आसीत्।

(ii) सूर्यदेवतायाः मन्दिरस्य भेल्लस्वामिनः इति लोकख्यातिरेव।

(iii) पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिंक केन्द्रमासीत्।

(iv) योगदर्शनस्य प्रणेता महर्षिः पतंजलिः आसीत।

(v) 'आसीत्'–अस् धातु– प्रथमपुरूषः।

**18 पद्यांशाधारित–** 10

अ **उत्तराणि–** ग

(i) गड.ा पापं हन्ति।

(ii) शशी तापं हन्ति।

(iii) कल्पतरूः दैन्यं हन्ति।

(iv) पापं तापं दैन्यं च सन्तोमहाशयाः घ्नन्ति।

(v) पुण्यम्

(ब) **उत्तराणि–**

(i) धनोपगूढं गगनम्।

(ii) ताराः भास्करः च दर्शनम् न अभ्युपैति।

(iii) धरणी जलौधैः वितृप्ता।

(iv) तमोविलिप्ता दिशाः न प्रकाशाः।

(v) 'घनोपगूढं'–धन+उपगूढं–गुणस्वरसन्धिः।

(स) **उत्तराणि–**

(i) पृथ्वीः सत्येन धार्यते।

(ii) रविः सत्येन तपते।

(iii) वायुः सत्येन वाति।

(iv) सर्वं सत्ये प्रतिष्ठितम्।

(v) 'धार्यते'–धृ धातु – लट् लकारः।

**(19) अपठित गद्यांशम्**

**उत्तराणि–** 5

क) जन्मभूमिः स्वर्गादपि गरीयसी।

ख) 'माताभूमिः' इति वैदिकऋषिः कथयति।

ग) परस्परैक्यभावनां विना राष्ट्रम् समृद्धं न भवति।

घ) 'स्वर्गात्'– पंचमी विभक्तिः।

ङ.) 'कदापि'– कदा+अपि–दीर्घस्वर सन्धिः

19. पत्रे सङ्केतं, सम्बोधनं, दिनाङ्कादिक दृष्ट्वा शुद्ध पत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः परीक्षकः अशुद्धि परीक्ष्य स्वविवेकेन अङ्काः प्रदेयः। 4

20. सम्पूर्ण शुद्ध निबन्धस्य कृते दश अङ्काः निर्धारिताः। परीक्षकः अशुद्धिं परीक्ष्य स्वविवेकन अङ्काः प्रदेयः। 10